National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(63): 133-135
© 2025 NJHSR
www.sanskritarticle.com

**अनुज कुमारः**
शोधच्छात्रः, वेद विभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-
विश्वविद्यालयः, दिल्ली

**Correspondence:**
**अनुज कुमारः**
शोधच्छात्रः, वेद विभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-
विश्वविद्यालयः, दिल्ली

# वैदिकसाहित्ये अष्टविधविवाहविमर्शः

**अनुज कुमारः**

संस्कारशब्दः समुपसर्गपूर्वकात् कृञ् धातोः घञि प्रत्यये सति निष्पद्यते। संस्कारस्य अनेकाः व्यत्पत्तिलभ्याः अर्थाः सन्ति। यथा- धार्मिकविधानम्, सांसारिकजीवने दीक्षितः पवित्रीकृतः अलङ्कृतः, परिष्कृतः, परिमार्जितः इत्यादयः। महर्षिकृष्णद्वैपायनेन षोडशसंस्काराणां परिगणना कृता अस्ति। तथा हि-

**गर्भाधानं पुंसवनं सीमन्तो जातकर्म च।**
**नामक्रिया निष्क्रमणान्नप्राशनं वपनक्रिया॥**
**कर्णवेधो व्रतादेशो वेदारम्भः क्रियाविधिः।**
**केशान्तः स्नानमुद्वाहो विवाहग्नि परिग्रहः।**
**त्रेताग्नि संग्रहश्चेति संस्काराः षोडशस्मृताः॥**[1]

षोडशसंस्कारेषु विवाहसंस्कारः अन्यतमः संस्कारोऽस्ति। विवाहः शब्दः 'वि' उपसर्गपूर्वक वह् धातोः घञि प्रत्यये सति निष्पन्नो भवति। यस्यार्थः विवाहः उद्वाहः, दारपरिग्रहः उपयमः, परिणयः, उपयामः, पाणिपीडनम्, करग्रहणम्, पाणिग्रहणादयश्च। परिणयसंस्कारः मानवमात्रस्य सामाजिक - आवश्यकता एव न आसीत् अपितु प्रत्येकस्य जनस्य धार्मिक-कर्तव्यम् अपि आसीत् विवाहसंस्कारः एका यज्ञीयसंस्था अस्ति । यः जनः विवाहं कृत्वा गृहस्थजीवने न प्रविशति सः "अयज्ञियः" इति कथ्यते -

**"अयज्ञियो वा एष योऽपत्नीकः"।**[2]

स्मृतिग्रन्थाः आश्रमव्यवस्थायाः दृढतापूर्वकं समर्थनं कुर्वन्ति। मनुस्मृति अनुसारं मानव - वयस्य आद्य चतुर्थभागं ब्रह्मचर्यपूर्वकं गुरुकुले उशित्वा विद्याध्ययनं द्वितीयभागे गृहस्थजीवनयापनं तृतीये भागे अरण्ये वानप्रस्थजीवनं चतुर्थभागे समस्तसंसारिक-बन्धनानि त्यक्त्वा सन्यस्तजीवनयापनं च करणीयमिति-

**"चतुर्थमायुषो भागमुषित्वाऽद्यं गुरौ द्विजः।**
**द्वितीयमायुषोभागं कृतद्वारो गृहे वसेत्"॥**[3]

विवाहः वैयक्तिकम् अपेक्षा पारिवारिको विषयः आसीत्। वस्तुतः उत्तमसन्तानोत्पादनार्थम् अस्य संस्कारस्य विशिष्टा उपयोगिता अस्ति। विवाहः वैयक्तिकजीवनस्य अपेक्षा सामाजिकं वा पारिवारिकं विषयो वर्तते। वस्तुतः अस्य संस्कारस्य प्रमुखा उपयोगिता अस्ति उत्तमगुणयुक्तं सन्तानोत्पादनम्। अनेन एव व्यक्तिः पूर्णताम् आप्नोति -

**"अर्धो ह वा एष आत्मनो यज्जाया तस्माद्यावज्जायां न विन्दते नैव तावत्प्रजायते असर्वो हि तावद् भवति। अथ यदैव जायां विन्दतेऽथ तर्हि सर्वो भवति"॥**[4]

महर्षिमन्वनुसारेण - सन्तानोत्पादनं धर्मानुष्ठानं सेवाकर्म उत्तमारतिः पितृजनानां च स्वर्गसाधनं स्त्रीणाम् एव अधीनं सन्ति -

**अपत्यं धर्मकार्याणि शुश्रुषा रतिरुत्तमा।**

**दाराधीनस्तथा स्वर्गः पितृणामात्मनश्च ह॥**[5]

तत्कालीनव्यवस्थानुसारेण महर्षिमनुमतानुसारेण विवाहस्य अष्टौ भेदाः वर्णिताः -

**ब्राह्मो देवस्तथैवार्षः प्राजापत्यस्तथासुरः।**

**गान्धर्वो राक्षरश्चैव पैशाचश्चाष्टमोऽधमः॥**[6]

**१.ब्राह्म विवाहः** - बह्मन् शब्दात् अण् प्रत्ययेन ब्राह्मः शब्दः इति निष्पद्यते। धर्मविधिनाविहितं अस्मिन् अनुष्ठाने कन्यायाः पिता शास्त्रज्ञस्य शीलसम्पन्नवरस्य चयनं कृत्वा स्वकन्यां आभूषणादिभिः अलङ्कृत्य स्वयमेव कन्यादानं करोति -

**आच्छाद्य चार्चयित्वा च श्रुतिशीलवते स्वयम्।**

**आहूय दानं कन्याया ब्राह्मो धर्मः प्रकीर्तितः॥**[7]

याज्ञवल्क्यस्मृत्यनुसारेण एतादृशी विद्वान् शीलगुणसम्पन्नवराय शास्त्रानुकूलं विधिना कन्यादानम् अनुष्ठानेन कन्यावरपक्षयोः एकविशतिं पूर्वजानां वंशजानाञ्च उदाहरणं भवति इति -

**ब्राह्मो विवाह आहूय दीयते शक्त्यलङ्कृतः।**

**तज्जः पुनत्युभयतः पुरुषानेकविंशतिम् ॥**[8]

एषो विवाहविधिः अधुनातनेऽपि सर्वाधिकं लोकप्रियः प्रचलितं च अस्ति। अतः प्रमुखतया अङ्गीक्रियते इति।

**२.दैव विवाहः** - दिव् धातोः अण् प्रत्यये सति "देव" शब्दः निष्पद्यते तथा देव शब्दात् अण् प्रत्यये दैव इति निष्पद्यते। एषा एका विलक्षण - विधिः भवति यदा कन्या यज्ञकर्त्रे पुरोहिताय यज्ञपरिसमाप्तौ दत्ता भवति सः विवाहः दैवविवाहः। अस्मिन् विवाहे कन्यायाः पिता स्वपुत्रीम् अलङ्कारैः आभूषयित्वा दक्षिणारुपेण ददाति स्म –

**"ऋत्विजे वितते कर्मणि दद्यादलङ्कृत्य स दैवः"**[9]

**३. आर्षविवाहः** - ऋषशब्दात् अण् प्रत्यये सति। आर्ष इति शब्द निष्पन्नो भवति। पद्धतिरेषाऽपि बहुप्रचलिता आसीत्। अत्र कन्यायाः पिता यज्ञधर्मकार्यादि सम्पन्नार्थं वरात् एकं गद्वेगोमिथुनं स्वीकरोति स्म -

**गोमिथुनं द्वे वा वरादादाय धर्मतः ।**

**कन्याप्रदानं विधि वदार्षो धर्म स उच्यते ॥**[10]

गोमिथुनं कन्यायाः मूल्यं नैव आसीत्। गोमिथुनस्य परिमाणं सीमितं पुनः यज्ञादिकं सम्पादयित्वा कन्यायाः पिता कन्यया सह गोमिथुनमपि वराय एव प्रयच्छति स्म -

**"धर्मनिमित्तौ ह्यसौ सम्बन्धो न लोभनिमित्तकः। गोमिथनग्रहणश्च स्वयं कन्योपकरणदानासमर्थस्य तद्दानार्थं वेदितव्यम् "।**[11]

**४.प्राजापत्यविवाहः –** प्रजापतिः शब्दात् यक् प्रत्यये सति प्राजापत्य इति शब्दः निष्पन्नो भवति। अत्र कन्यापिता स्व कन्याय पाणिग्रहणं योग्य वरेण सह करोति। अस्मिन् विवाहे वधुवरः च नागरिक – धार्मिकश्च कर्तव्यानां पालनं करोति स्म स्वयं **"प्रजापतिः"** संज्ञा एव सूचयति यत् नवदनम्पतिः ऋणाम् उऋणां भुवन तथा उत्तम सन्तानोत्पादनार्थं तस्य परिपोषणार्थश्च परस्परं अस्मिन् विवाहे परिसम्बध्यते इति –

**सहोभौ चरतां धर्ममिति वाचानुभाष्य च ।**

**कन्या प्रदानमभ्यर्च्य प्राजापत्यो विधिः स्मृता ॥**[12]

**५.आसुर विवाहः –** असुर शब्दात् अण् प्रत्यये सति आसुरः इति शब्दः निष्पद्यते। अस्मिन् विवाहे वरः कन्यायै तथा तस्याः पारिवारिक जनेभ्यः च यथाशक्ति धनं दत्त्वा स्वच्छन्दतापूर्वक कन्यया सह विवाहं करोति। अतः **"आसुर विवाह"** इति कथ्यते –

**ज्ञातिभ्यो द्रविवां दत्त्वा कन्यायै चैव शक्तितः।**

**कन्याप्रदानं स्वाच्छन्द्यासुरो धर्मः उच्यते॥**[13]

विधिरेषः हेयः आसीत्। अतः एव क्रीता स्त्री पत्नीपदं कदापि न प्राप्नोति। देवकार्ये पितृकार्येऽपि तस्याः अधिकारः न भवति स्म –

**क्रीता द्रव्येण या नारी न सा पत्नी विधीयते।**

**न सा दैवे न सा पित्र्येदासीं तां कवयो विदुः॥**[14]

**६.गान्धर्वविवाहः –** गन्धर्वशब्दात् अण् प्रत्यये सति गान्धर्व इति शब्दः निष्पद्यते। विवाहेऽस्मिन् वधूवरयोः परस्परं चयनं कृत्वा गमनं कुर्वन्ति स्म। अत्र कन्यायाः वरस्य च पितरौ तेषां चयनं न कुर्वन्ति स्म, अपितु वधुवरः एव कामनया वशीभूतं भूत्वा विवाहं कुर्वन्ति अतएव गान्धर्वो विवाहः कथ्यते। तथ्यमिदम् उद्घाटितं महर्षिणा मनुना –

**इच्छायाऽन्यसंयोगः कन्यायाश्च वरस्य च।**

**गान्धर्वस्य तु विज्ञेयो मैथुन्यः कामसम्भवः॥**

केचन विद्वद्भिः अनुसारेण अयं विवाहः प्रशस्तः मन्यते। अस्य कारणमस्ति यत् पारस्परिकम् आकर्षणं प्रेम इति –

**"गान्धर्वमन्येके प्रशंसन्ति स्नेहानुगत्वात्"**[15]

परञ्च अधिकांशाः स्मृतिकाराः गान्धर्वविवाहम् अप्रशस्त विवाहेषु एव परिगण्यन्ते अस्य मूलकारणमस्ति धार्मिकतानैतिकतायाः सर्वथा अभावः –

**"गान्धर्वस्तु क्रियाहीनः रागादेव प्रवर्तते"**[16]

**७.राक्षसविवाहः -**रक्षस् शब्दात् अण् प्रत्यये सति आसुरः इति शब्दः निष्पद्यते। विवाहस्य अयं भेदः अप्रशस्तम् आसीत्। अत्र कन्यायाः पिता वा कन्याया अनुमतिं विना बलपूर्वकं कन्याहरणं भवति स्म। सामान्यतः कन्यापक्षीयान् सम्बन्धीजनान् क्षत -विक्षतं कृत्वा रुदन्त्याः कन्यायाः बलपूर्वकं हरणं क्रियते तथ्यमिदम् उद्घाटितं महर्षिणा मनुना -

**हत्वा छित्वा च भित्वा च क्रोशन्ती रुदती गृहात् ।**

**प्रसह्य कन्या हरतो राक्षसो विधिरुच्यते ॥**[17]

अस्य विवाहस्य उद्भवः युद्धकारणात् अभवत् स्यात् – **"राक्षसो युद्धहरणरीतिः"॥** विधिरेषः क्षत्रियाणां कृते प्रशस्तं आसीत् **–**

**"राक्षसं क्षत्रियस्यैकम्"।**[18]

**८.पैशाचविवाहः -**पिशाचशब्दात् अण् प्रत्यये सति पैशाच इति शब्दः निष्पद्यते। विधिरेषः सर्वाधिक अधर्मः अप्रशस्तं हेयः च आसीत्। अतः अत्यन्तं नीचतमं विधिः**-**

**"पैशाचश्चाष्टमोऽधमः"।**[19]

मनोः अनुसारेण यदा एकान्ते सुप्ता मत्ता प्रमन्ता वा कन्यया सह मैथुनं क्रियते। सः एव पैशाचविवाहः इति **–**

**सुप्ता मत्ता प्रमन्ता वा रहो यत्रोपगच्छति।**
**स पापिष्ठो विवाहानां पैशाचश्चाष्टमोऽधमः॥**[20]

अतः एषः विवाहः सर्वाधिक असभ्यः अमर्यादितश्च आसीत्।

**उपसंहारः**

विवाहसंस्कारेणैव संस्कारिताः जनाः गृहस्थाश्रमे प्रविशन्ति। गृहस्थाश्रमाः सर्वश्रमाणाम् उपकारकः अस्ति। अतः एव उक्तम् अस्ति **-**

**त्रयाणामाश्रमाणां तु गृहस्थो योनिरुच्यते ।**[21]

यथा सर्वे जीवाः स्वकीया मातरम् आश्रित्य एव जीवनधारणं कुर्वन्ति, तथैव गृहस्थाश्रममाश्रित्य सर्वे आश्रमाः जीवन्ति वर्धयन्ति च **–**

**"यथा मातरमाश्रित्य सर्वे जीवन्ति जन्तवः।**

**एवं गृहस्थमाश्रित्य वर्त्तन्त इतरेऽश्रमाः"॥**[22]

अतः विवाहसंस्कारेण एव वंश वृद्धिः पितृऋणात् मुक्तिः, यज्ञादि - धार्मिक - अनुष्ठानेषु योग्यता, सामाजिकं धार्मिकं वा कर्तव्याणां निर्वाहः, धर्मानुसारं कामाचरणम्, त्रिवर्गप्राप्तिः इत्यादीनां सिद्धिर्भवति

**सन्दर्भ ग्रन्थः-**

1. व्यासस्मृति -१/१३/१५
2. तैत्तिरीय ब्राह्मण -२/२/२/६
3. मनुस्मृति -४/१
4. शतपथब्राह्मणम् -५/२/१/१०
5. मनुस्मृति -९/२८
6. मनुस्मृति -३/२१
7. मनुस्मृति -३/२७
8. याज्ञवल्क्यस्मृतिः -१/५८
9. आपस्तम्बगृह्यसूत्रम् -१/६
10. मनुस्मृतिः -३/२९
11. वीरमित्रोदय सं.भा.१पृ.सं.८
12. मनुस्मृति -३/३०
13. मनुस्मृति -३/३१
14. बौ.ध.सू - १/२/२०
15. गौ.ध.सू -२/१/३१
16. वीरामित्रोदय भा. -२पृ.५७
17. मनुस्मृति -३/३३
18. मनुस्मृति -३/२४
19. मनुस्मृति -३/२१
20. मनुस्मृतिः- ३/२४
21. दक्षस्मृति -२/४२
22. महाभारतम्- १२/२६१/६